# B.A. 3rd Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 30912** **Course Code : AH/SNS-302C-6**

Course Title: Indian Social Institution and Polity

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

1. अधोलिखितेषु यथेच्छं *पञ्चानाम्* उत्तराणि लिखत। *एकस्य* उत्तरम् अवश्यमेव संस्कृतभाषया देवनागरीलिप्या च देयम्। 2×5=10

   (a) प्रभुः राजानं किमर्थं सृष्टवान्?

   (b) उपायचतुष्टयं किमिति मनुसंहितानुसारं लिखत।

   (c) याज्ञवल्क्यसंहितानुसारं कति प्रमाणानि? कानि च तानि?

   (d) 'विवादयेत् सद्य एव'– केषु विषयेषु उत्तरपादलेखनकाले कालप्रतीक्षणं न कर्तव्यम्?

   (e) अर्थशास्त्रानुसारं ब्राह्मणस्य कर्तव्यं किम्?

   (f) बृहस्पत्यनुसारं कति विद्या? काश्च ताः?

   (g) प्रत्यर्थिनः अग्रतः लेखनकाले अर्थी सुस्पष्टतया केषां विषयाणाम् उल्लेखं कुर्यात्?

   (h) अर्थशास्त्रे उक्तानां चतुर्णाम् आचार्याणां नामानि लिखत।

2. यथेच्छं *द्वयोः* श्लोकयोः सप्रसङ्गव्याख्या संस्कृतभाषया देवनागरीलिपिम् आश्रित्य कार्या। 5×2=10

   (a) अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
   रक्षार्थम् अस्य सर्वस्य राजानमसृजत् प्रभुः।।

   (b) दण्डः शास्ति प्रजाः सर्वाः दण्ड एवाभिरक्षति।
   दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः।।

   (c) अपि यत् सुकरं कर्म तदप्येकेन दुष्करम्।
   विशेषतोऽसहायेन किमु राज्यं महोदयम्।।

3. यथेच्छम् *एकस्य* श्लोकस्य संस्कृतभाषया देवनागरलिप्या सप्रसङ्गव्याख्या कार्या। 5×1=5

   (a) स्मृत्याचारव्यपेतेन मार्गेणाधर्षितः परैः।
   आवेदयति चेद्राज्ञे व्यवहारपदं हि तत्।।

   (b) पश्यतोऽब्रुवतो भूमेर्हानिर्विंशतिवार्षिकी।
   परेण भुज्यमानायाः धनस्य दशवार्षिकी।।

**4.** अधोनिर्दिष्टयोः *एकः* प्रश्नः संस्कृतभाषया देवनागरीलिप्या च समाधेयः। 5×1=5

(a) अर्थशास्त्रम् अनुसृत्य त्रयीविषयिणी टीका लेख्या।

(b) अर्थशास्त्रम् आश्रित्य आन्वीक्षिकीविषये टिप्पणी लेख्या।

**5.** कश्चन *एकः* प्रश्नः संस्कृतभाषया देवनागरीलिपिम् आश्रित्य समाधेयः। 10×1=10

(a) अमात्यनियुक्तिविषये पूर्वाचार्याणां मतानि उक्त्वा कौटिल्यमतम् आलोचयत।

(b) याज्ञवल्क्यसंहितानुसारम् ऋणदानस्वरूपं वर्णनीयम्।

(c) मनुसंहितानुसारं राज्यशासने दण्डस्य गुरुत्वं वैशद्येन आलोचनीयम्।

———